(Pages : 5)

exam WiNNER

# SSLC EXAMINATION, MARCH - 2024

## SANSKRIT

First Language - (Academic & Oriental) Paper I

Time : 1½ Hours | Total Score : 40

निर्देशाः -

- 15 निमेषाः समाश्वासकालः, कालोऽयं प्रश्नानां वाचनाय उत्तराणाम् आसूत्रणाय च उपयोक्तव्यः।
- प्रश्नान् प्रश्ननिर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानां उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या।

Score

1. **चतुर्णां समुचितमुत्तरं कोष्ठकात् चित्वा लिखत।** 4x1=4

(क) अभिज्ञानशाकुन्तलं नाटकं केन विरचितम्?

(भासेन, कालिदासेन, शूद्रकेण, माघेन)

(ख) सुखदुःखयोः कर्ता कः?

(मनः, शरीरम्, आत्मा, बुद्धिः)

(ग) 'बलीवर्दः' इति पदस्य समानार्थकं पदं किम्?

(रासभः, वृषभः, कृषकः, वृत्रहा)

(घ) किं गणे नान्तर्भवति?

(रघुवंशम्, शिशुपालवधम्, नैषधीयचरितम्, ऊरूभङ्गम्)

(ङ) 'उत्तिष्ठत जाग्रत प्राप्यवरान्निबोधत' इति वाक्यं कस्याम् उपनिषदि अन्तर्भवति?

(कठोपनिषदि, मुण्डकोपनिषदि, प्रश्नोपनिषदि, केनोपनिषदि)

(च) 'प्रददावामलकं व्रतीन्दवे' - अत्र व्रतीन्दुः कः?

(कुटुम्बिनी, लक्ष्मीः, श्रीशङ्करः, माधवविद्यारण्यस्वामी)

Score

2. **यथोचितं पट्टिकां पूरयत।** 4x1=4

| कृतिः | कर्ता | विभागः |
|---|---|---|
| उदा: शिशुपालवधम् | माघः | महाकाव्यम् |
| शङ्करदिग्विजयम् | ------- | महाकाव्यम् |
| ------- | महात्मागान्धी | आत्मकथा |
| महाभारतम् | व्यासः | ------- |
| ------- | पी.सी. देवस्या | महाकाव्यम् |

3. **उदाहरणानुसारं विग्रह लिखत।** 1x1=1

उदा – व्रती – व्रतम् अस्य अस्ति इति।

धनी – __________।

4. **अधोदत्तवाक्यात् संबोधनपदं चित्वा लिखत।** 1x1=1

आचार्य! अहं सन्तुष्टोऽस्मि।

5. **उदाहरणानुसारं पदच्छेदं लिखत।** 1x1=1

उदा – नोत्थितः → न + उत्थितः।

नोचितः → __________+__________।

**6-10 चतुर्णाम् उत्तराणि लिखत।** 4x2=8

6. अधोदत्तं वाक्यं पठित्वा शतृशानजन्तौ विविच्य लिखत।

हरिणेन नीयमानः दुष्यन्तः वने चरन् आश्रमं प्राप।

शत्रन्तम् __________।

शानजन्तम् __________।

7. **सुभाषितं पठित्वा उचितमाशयं चित्वा लिखत।**

परिश्रमो मिताहारो<br>
भूगतावश्विनीसुतौ।<br>
तावनादृत्य नैवाहं<br>
वैद्यमन्यं समाश्रये।।

(क) ईर्ष्यया सेवमानः आहारः न दहते।

(ख) व्यायामः मन्दमेव करणीयः।

(ग) ये जनाः व्यायामं मिताहारं च अनुशीलयन्ति तेषां कृते अन्यस्य वैद्यस्य आवश्यकता नास्ति।

Score

8. **उदाहरणानुसारं पट्टिकां पूरयत।**

| | लट् | लङ् | लोट् |
|---|---|---|---|
| उदा. | नयति | अनयत् | नयतु |
| | गच्छति | ---- | गच्छतु |
| | पश्यति | अपश्यत् | --- |

9. **यद्यपि-तथापि उपयुज्य वाक्यद्वयं योजयत।**

उदा – राजुः यथासमयं बस्निस्थानं गतः।

सः बस् यानं न अलभत।

यद्यपि राजुः यथासमयं बस्निस्थानं गतः

तथापि बस्यानं नालभत।

सः शरीरेण दुर्बलः। मनसा शक्तः भवति।

10. **अधोदत्तं वाक्यं पठित्वा ल्यबन्त – तुमुन्नन्तपदे चित्वा लिखत।**

दमयन्तीं परिणेतुं प्रस्थितं नलम् उपगम्य

देवाः दमयन्तीं प्रति तेषाम् अनुरागंप्रकटयन्ति।

ल्यबन्तम्____________।

तुमुन्नन्तम्____________।

**11-13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत।** **2x4=8**

11. **श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी।।

(क) कः फलं दास्यति ?

(ख) 'चैवं' इत्यस्य पदच्छेदं कुरुत ?

(ग) दक्षिणहस्तदत्ता भिक्षा केन मा ज्ञायताम् ?

(घ) श्लोकात् क्रियापदं चित्वा लिखत ?



exam WiNNER ®

12. **सम्भाषणांशान् पूरयत।**

ग्रन्थालयी : नमस्ते। आगच्छतु छात्र।

छात्रः : ___________ । अत्र ___________ अस्ति किं ?

ग्रन्थालयी : आम्, अमरकोशः अस्ति।

अस्य ___________ कः ? जानासि ?

छात्रः : अस्य रचयिता अमरसिंहः खलु।

ग्रन्थालयी : बाल !, अमरकोशस्य नामान्तरं किम् ?

छात्रः : अमरकोशस्य ___________ भवति नामलिङ्गानुशासनम्।।

13. **खण्डिकां पठित्वा जीवनचरितरूपरेखां लिखत।**

सर्वोच्चन्यायालयस्य प्रथमवनिता न्यायाधिपा श्रीमती फात्तिमाबीवी 1927 अप्रैल् 30 तमे दिने पत्तनंतिट्टा देशे अजायत। मीरा साहिब्, खदीजाबीवी च तस्याः पितरौ भवतः। रसतन्त्रे, नियमे च बिरुदं सम्पाद्य असौ अभिभाषकवृन्तौ विरराज। 1983 तमे वर्षे केरलेषु उच्चन्यायालये एषा न्यायाधिपा अभवत्। भारतज्योतिपुरस्कारं प्राप्ता फात्तिमाबीवी 1997 तमे वर्षे तमिल्नाट् राज्ये राज्यपाला अभवत्। 2023 नवंबर 23 तमे दिने महाशया दिवंगता।

नाम :

जन्म :

पितरौ :

कर्ममण्डलम् :

पुरस्कार :

मृत्यु :

14. **प्रादेशिकभाषायां विवर्तयत।** 1x5=5

तञ्चावूर देशे त्यागराजो नाम सङ्गीतोपासकः जीवति स्म। सः अतीव निर्धनः आसीत्। सङ्गीतत्रिमूर्तिषु अन्यतमः आसीत् अयं महात्मा। तस्य निर्धनत्वं विज्ञाय शरभोजिमहाराजः साहाय्यं कर्तुम् अचिन्तयत्। त्यागराजः तत् निरस्य ईश्वरभजनमेव वरम् इति सन्देशं राज्ञे प्रैषयत्।।

**15-17 प्रश्नेश्यः द्वयोः उत्तरे लिखत।** 2x4=8

15. सूचनानुसारं रघुवंशम् अधिकृत्य लघूपन्यासं लिखत।

पञ्चमहाकाव्यानि कालिदासः दिलीपः ........ अग्निवर्णः ........ सीतापरित्याग ........ वाल्मीकेः आश्रमः।।

Score

16. **खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

सस्यविज्ञानमधिकृत्य विरचितेषु ग्रन्थेषु सुरपालस्य 'वृक्षायुर्वेदः' प्रसिद्धोऽस्ति। त्रयोदशाध्यायैः सम्पन्नेऽस्मिन् ग्रन्थे तरुमहिमा, भूमिनिरूपणम्, रोगचिकित्सादयः विशदीक्रियन्ते। सस्यानि सर्वाणि प्रमुखतया वृक्षः, वनस्पतिः, वीरुत्, ओषधिः इति भेदेन चतुर्धा सन्ति।

आम्रजम्ब्वादयः वृक्षाः, पनसोदुम्बरादयः वनस्पतयः। कारवेल-कूश्माण्डादयः वीरुधः। व्रीहीगोधूमादयः ओषध्यः च भवन्ति। सस्यानां संरक्षणं सर्वथा सर्वदा करणीयम्।

(क) वृक्षायुर्वेदस्य कर्ता कः ?

(ख) सस्यानि कतिविधानि सन्ति ?

(ग) पनसः कस्मिन् विभागे अन्तर्भवति ?

(घ) 'सम्पन्नेऽस्मिन्' इत्यस्य पदच्छेदं कुरुत ?

17. **सूचनानुसारं श्रीशङ्कराचार्यम् अधिकृत्य लघूपन्यासं लिखत।**

अद्वैतचिन्ता ........ केरलीयः ........ शिवगुरुः ........ शङ्करदिग्विजयं ........ कनकधारास्तवम्।

-oOo-